Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : BFSV-03**

# स्नातकपरीक्षाः—२०१६

## बि.ए.१ — विद्वन्मध्यमा -प्रथमवर्षः

## शास्त्रम्— व्याकरणम्

### भागः - २, पत्रिका -३

### विषयः - सिद्धान्तकौमुदी (आदितः हलन्तशब्दाधिकरणपर्यन्तम्)

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. सङ्क्षेपेण उत्तरं लिखत** **10x 01 = 10**

१. 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रे आस्यशब्दस्य कोऽर्थः ?

२. ऋकारः कति वर्णानां सञ्ज्ञा स्यात् ?

३. 'षष्ठीस्थानेयोगा' इति सूत्रादेव स्थाने इत्यनुवर्तमाने 'स्थानेऽन्तरतमः' इति सूत्रे स्थानेग्रहणं किमर्थम् ?

४. 'न पदान्त' सूत्रे दीर्घविधौ स्थानिवद्भावनिषेधस्य किमुदाहरणम् ?

५. 'धातोस्तन्निमित्तस्यैव' इति सूत्रे एवशब्दाध्याहारस्य किं फलम् ?

६. 'इच्छोऽटि क इति सूत्रस्यार्थोदाहरणे लिखत ।

७. अङ्गसञ्ज्ञासूत्रे तदादिग्रहणस्य किं फलम् ?

८. सर्वादिगणे समशब्दः सर्वपर्यायः गृह्यते । तुल्यपर्यायस्य अग्रहणे किं ज्ञापकम् ?

९. 'ङिति ह्रस्वश्च' इति सूत्रस्यार्थं लिखत ।

१०. 'अनड्वान्' इत्यत्र नकारस्य 'वसुस्रंसुध्वंस्वनडुहांदः' इति दकरादेशः कुतो न भवति ?

**II. यथारुचि अष्टौ प्रश्नाः समाधेयाः** **08 x 05 = 40**

१. 'हलन्त्यम्' इति सूत्रे अन्योन्याश्रयदोषमुद्भाव्य परिहरत ।

२. 'द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि ।
तवल्कारादिषु बुधैः बोध्यं रूपचतुष्टयम् ।।' इति कारिकोक्तदिशा रूपचतुष्टयं ससूत्रं साधयत ।

३. 'गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम्' इति सूत्रं सोदाहरणं व्याख्यात ।

४. 'चतुर्मुखः' इत्यत्र 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रस्य अप्रवृत्तौ कारणं विलिख्य कथं तर्हि 'मदोदग्राः ककुद्मन्तः' इति पङ्क्त्याशयं लिखत ।

५. घनाघनः क्षोभणः, शम्भू राजते इति प्रयोगौ साधयत ।

–अनुवर्तते

६. 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रं यथाग्रन्थं व्याख्यात ।

७. सर्वादिगणे उभशब्दपाठस्य प्रयोजनं विलिख्य 'उभये' इत्यत्र 'प्रथमचरम-' इति विकल्पः कुतो नेति लिखत ।

८. तिसृणाम्, दध्ना इति रूपे साधयत ।

९. 'वाह ऊठ्', 'अदसोऽसेर्दादुदोमः' इति सूत्रयोः सोदाहरणं व्याख्यां विधत्त ।

१०. अमुना, इयम् इत्यनयोः प्रक्रियां लिखत ।

## III. पञ्चानां प्रश्नानां समाधानं लिखत — 05x 10= 50

१. ग्रन्थोक्तदिशा स्थानिवद्भावाद्याशङ्कासमाधानपूर्वकं सुद्ध्युपास्य इति रूपं साधयत ।

२. 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रं सोदाहरणं सदलकृत्यं व्याख्यात ।

३. 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रं व्याख्याय प्रतिपदस्य सार्थक्यं लिखत ।

४. सावतरणं व्याख्यात ।

(अ) कथं तर्हि दुर्धियः वृश्चिकभियः इति ?

(आ) कथं तर्हि हापितः क्वासि हे सुभ्रु इति भट्टिः ?

५. 'गुणनाभावौ त्वनुड्भिः परत्वात्पुंसि बाध्यते ।
क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम् ।।' इति कारिकां सप्रसङ्गं व्याख्यात ।

६. 'अतिखट्वाय' इत्यत्र याडापत्तिमुद्भाव्य परिहरत ।

७. 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रं व्याख्याय हे कतरत्कुल इत्यत्र सम्बुद्धिलोपः कुतो नेति लिखत ।

८. 'श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः' इत्यादिकारिकास्थयुष्मदस्मच्छब्दरूपाणि सूत्रार्थविवरणपूर्वकं साधयत ।

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : BFSV-04**

# स्नातकपरीक्षाः—२०१६

## बि.ए.१ — विद्वन्मध्यमा -प्रथमवर्षः

## शास्त्रम्— व्याकरणम्

### भागः -२ , पत्रिका -४

### विषयः - वैयाकरणसिद्धान्तकौमुदी-२

**दिनाङ्कः** - 05-04-2016 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. रिक्तस्थानं पूरयत** **10x01 = 10**

१. 'चाक्षुषम्' इत्यस्य विग्रहः................इतति ।

२. 'राष्ट्रियः' इत्यत्र...........तद्धितप्रत्ययः ।

३. 'ग्रामीणः' इत्यत्र........सूत्रेण खञ्प्रत्ययो विधीयते ।

४. युवयोर्युष्माकं वा अयं..............।

५. 'त्यदादीनि च' सूत्रेण.........सञ्ज्ञा विधीयते ।

६. 'प्रोष्ठपाद' इत्यस्यार्थः.................।

७. 'परकीयम्' इत्यत्र कुगागमविधायकं सूत्रं...........इति ।

८. 'श्रेयसि भवम्' इत्यस्य परिनिष्ठितं रूपं...............इति ।

९. यत्र पूर्वैरुषितं सः...........।

१०. 'पाश्चजन्यम्' इत्यत्र........वार्तिकेन ञ्यप्रत्ययो विधीयते ।

**II. सप्रमाणं षण्णामेव प्रक्रियाः प्रदर्शयत** **06x05=30**

१. कैशोरम् २. चातुर्वैद्यः

३. मौढ्यम् ४. आलस्यम्

५. षष्ठः ६. मुष्करः

७. साक्षी ८. विद्यावान्

९. पार्श्वकः १०. तुरीयः

**III. इमे वार्तिके ससन्दर्भं व्याख्यात** **02x05=10**

१. चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यानम् ।

२. शीतोष्णतृप्रेभ्यस्तदसहने ।

—अनुवर्तते

## IV. यथारुचि चतुरः प्रश्नान् समाधत्त 04x 10=40

१. 'भूमनिन्दाप्रशंसासु.............मतुबादयः । वार्तिकमिदं सोदाहरणं व्याख्यात ।

२. स्वाङ्गलक्षणं ग्रन्थोक्तदिशा विशदयत ।

३. सदलकृत्यं 'प्रत्ययस्थात् कात्पूर्वस्यात्..' सूत्रं विवृणुत ।

४. 'जातेरस्त्रीविषयादयोपधात्' सूत्रोक्तं जातिलक्षणं यथाग्रन्थं विलिखत ।

५. 'उदीचामातःस्थाने........'सूत्रार्थमुपवर्ण्य 'आतः' इत्यस्य प्रयोजनं सोदाहरणं निरूपयत ।

६. 'हलस्तद्धितस्य' सूत्रं यथाग्रन्थं विवेचयत ।

## V. वाक्येनैकेन उत्तरं लिखत 10x 01=10

१. 'हिमानी' इत्यस्य कोऽर्थः ?

२. स्थलशब्दात् कस्मिन्नर्थे ङीष्प्रत्ययो भवति ?

३. 'ऊरुमात्री' इत्यस्य विग्रहः कथम् ?

४. 'पत्युर्नो यज्ञसंयोगे' सूत्रं कं विधत्ते ?

५. 'मनः' सूत्रस्य कोऽर्थः ?

६. 'साङ्काश्ये भवा' इत्यस्य परिनिष्ठितरूपं किम् ?

७. 'धीवरी' इत्यत्र किं प्रातिपदिकम् ?

८. 'नदी' इत्यत्र ङीप्प्रत्ययः किन्निमित्तकः ?

९. उकारान्तप्रातिपदिकात् स्त्रियां कः प्रत्ययो भवति ?

१०. 'कुमारी' इत्यत्र ङीप्प्रत्ययः केन सूत्रेण ?

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : BSSV-03**

# स्नातकपरीक्षाः–२०१६

## बि.ए.२ – विद्वन्मध्यमा -द्वितीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -२ , पत्रिका -३

### विषयः - वैयाकरणसिद्धान्तकौमुदी-१

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. रिक्तस्थानं पूरयत** **10x01 = 10**

१. 'गूहति' इत्यत्र ऊकारः........सूत्रेण विहितः ।

२. 'बभ्रतुः' इत्यत्र........तिङ्प्रत्ययः ।

३. 'उबुन्दिर् निशामने' इत्यत्र 'निशामनम्' इत्यस्य ......इत्यर्थः ।

४. 'ववन्दे' इत्यत्र........धातुः ।

५. भवति-बभूव । धयति-...........।

६. स्पदिधातोरर्थः........इति ।

७. 'स्पर्धिता'इत्यत्र.......विकरणप्रत्ययः ।

८. परस्मैपदसञ्ज्ञाविधायकं सूत्रं..............इति ।

९. न्यक्करणमित्युक्ते..........इत्यर्थः ।

१०. 'अपक्षीत्' इति.......लकारस्य रूपम् ।

**II. षण्णामेव प्रक्रियाः ससूत्रं प्रदर्शयत** **06 x 05 = 30**

१. भवन्ति २. पठसि

३. एधस्व ४. अभवत्

५. चिक्रीड ६. बभूवुः

७. सेत्स्यति ८. एधिताहे

९. पस्पर्धे १०. अभविष्यत्

**III. टिप्पणीमारचयत** **02x 05= 10**

१. तिङ्प्रत्ययाः

२. उपसर्गाः

–अनुवर्तते

## IV. यथेष्टं चत्वारि सूत्राणि व्याख्यात 04x 10=40

१. सार्वधातुकार्धधातुकयोः

२. आतो ङितः

३. अतो दीर्घो यञि

४. लोट् च

५. पुगन्तलघूपधस्य च

६. अस्तिसिचोऽपृक्ते

७. आत्मनेपदेष्वनतः

८. अत एकहल्मध्येऽनादेशादेर्लिटि

## V. वाक्येनैकेन उत्तरं लिखत 10x01=10

१. 'इट ईटि' सूत्रस्यार्थः कः ?

२. 'गुञ्जति' इत्यत्र को धातुः ?

३. 'ऊर्दते' इत्यत्र दीर्घः केन सूत्रेण भवति ?

४. 'आसेचनम्' इत्यस्य कोऽर्थः ?

५. 'जजम्भे' इत्यत्र नुमागमविधायकं सूत्रं किम् ?

६. अजगतिक्षेपणयोर्धातोः लिट्लकारप्रथमपुरुषैकवचनरूपं किम् ?

७. 'स्पर्ध सङ्घर्षे' इत्यत्र सङ्घर्षपदार्थः कः ?

८. 'हिण्डते' इत्यस्य प्रकृतिः का ?

९. 'असैद्धाम्' इत्यत्र सलोपः केन सूत्रेण भवति ?

१०. 'शर्पूर्वाः खयः' इत्यत्र अभ्यासपदं केन सूत्रेणानुवर्तते ?

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : BSSV-04**

# स्नातकपरीक्षाः–२०१६

## बि.ए.२ – विद्वन्मध्यमा -द्वितीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -२ , पत्रिका -४

### विषयः - वैयाकरणसिद्धान्तकौमुदी-२(पूर्वोत्तरकृदन्तप्रकरणम्)

**दिनाङ्कः** - 05-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. सङ्क्षेपेण उत्तरं लिखत ।** **10x 01 = 10**

१. 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रे तयोरिति कयोर्ग्रहणम् ?

२. 'वध्यः' इत्यत्र हनधातोः यत्प्रत्ययः वधादेशश्च केन इति लिखत ।

३. 'अमावास्या' इति शब्दस्य का व्युत्पत्तिः ?

४. 'पादहारकः' इति शब्दे विग्रहं प्रदर्श्य ण्वुल्प्रत्ययः कस्मिन्नर्थे इति लिखत ।

५. 'अम्बाम्बगोभूमि...' इति सूत्रं सम्पूर्णं लिखत ।

६. 'अभिहितम्' इत्यत्र धाधातोः ह्यादेशविधायकं सूत्रं लिखत ।

७. उपसमाधानं नाम किम् ? तस्मिन्नर्थे घञः किमुदाहरणम् ?

८. 'कृत्या' इत्यत्र कः प्रत्ययः ? किञ्च तद्विधायकं सूत्रम् ?

९. 'भावे' इति सूत्रस्यार्थं सोदाहरणं लिखत ।

१०. 'भुक्त्वा व्रजति' इत्यत्र क्त्वाप्रत्ययविधायकं सूत्रं किम् ?

**II. अष्टौ प्रश्नान् समाधत्त** **08x 05 = 40**

१. 'कृत्यचः' इति सूत्रं सोदाहरणं व्याख्यात ।

२. आचार्यः-आचर्यः, समाजः-समजः इति पदयुगलयोः अर्थभेदं लिखित्वा प्रक्रियां च प्रदर्शयत ।

३. प्रियः, जल्पाकः इत्यनयोः सिद्धिः कार्या ।

४. सावतरणं व्याख्यात–

१). कथं तर्हि 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इति ?

२). कथं तर्हि 'लोध्रद्रुमं सानुमतः प्रफुल्लम्' इति ?

५. 'क्विब्वचिप्रच्छि' इति वार्तिकं सम्पूर्णं विलिख्य सर्वाणि उदाहरणानि साधयत ।

–अनुवर्तते

६. ‘तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्’ इति सूत्रं व्याख्याय अत्र वासरूपन्यायेन तृजादयः कुतो नेति स्पष्टयत ।

७. व्यावक्रोशी, ग्रहः इत्यनयोः प्रक्रियां लिखत ।

८. ‘सञ्ज्ञायां समज...’ इति सूत्रं प्रपूर्य एकमुदाहरणं प्रक्रियासहितं लिखत ।

९. ‘षत्वतुकोरसिद्धः’ इति सूत्रं सोदाहरणं व्याख्यात ।

१०. ‘मूलकेनोपदंशं भुङ्क्ते’ इत्यत्र असामर्थ्यमाशङ्क्य समासः कथमिति लिखत ।

**III. यथारुचि पञ्च प्रश्नाः समाधेयाः ।** **10x 05= 50**

१. भिदेलिमाः, देयम्, ब्रह्मभूयम्, शिष्यः इत्येतेषां प्रक्रियां लिखत ।

२. सोदाहरणं व्याख्यात ।-१. कर्मण्यण् २. तुन्दशोकयोः परिमृजापनुदोः ।

३. प्रियंवदः, द्विषन्तपः, पन्नगः, विहगः इतीमानि रूपाणि साधयत ।

४. ‘सुप्यजातौ णिनिस्ताच्छील्ये’ इति सूत्रं सोदाहरणं व्याख्याय, दलसार्थक्यं च लिखित्वा वृत्तिकारमतं भाष्यविरोधादुपेक्ष्यम् इत्यंशं स्फुटयत ।

५. पक्वः, क्षामः, प्रस्तीमः, फल्लः इत्येतेषां सिद्धिप्रकारं लिखत ।

६. ‘अकर्तरि च कारके सञ्ज्ञायाम्’ इति सूत्रम्, ‘अपादाने स्त्रियामुपसङ्ख्यानम्’ इति वार्तिकं च सोदाहरणं व्याख्यात ।

७. ‘समासेऽनञ्पूर्वे क्त्वो ल्यप्’ इति सूत्रं व्याख्याय ‘अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते’ इति सप्रसङ्गं निरूपयत ।

८. ससूत्रम् एतान् प्रयोगान् साधयत ।

१. कन्यादर्शं वरयति ।

२. हस्तवर्तं वर्तयति ।

३. अजकनाशं नष्टः

४. शुष्कपेषं पिनष्टि

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : MR-07**

# स्नातकपरीक्षाः—२०१६

## बि.ए.३ — विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्— व्याकरणम्

**भागः - १, पत्रिका -१**

## विषयः - परिभाषेन्दुशेखरः

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. सावतरणं परिभाषापञ्चकं व्याख्यात** **05x 10 =50**

१. अभेदकाः गुणाः ।

२. उपपदविभक्तेः कारकविभक्तिर्गरीयसी ।

३. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ।

४. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

५. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।

६. सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ।

**II. अधो निर्दिष्टानाम् अष्टानामेव आशयं परिहारश्च विशदयत ।** **08x 05 = 40**

१. ननु पूरणगुणसुहितार्थ....इति निषेधः तव्यति स्यात्,
तथा 'दिव औत्' इति औकारः क्विप्यपि स्यात् ।

२. ननु 'सर्वादीनि' इत्यत्र बहुव्रीहौ, अन्यपदार्थप्राधान्येन सर्वशब्दस्य सर्वनामसञ्ज्ञा न स्यात् ।

३. 'तस्यापत्यम्' इत्येकवचननपुंसकाभ्यां गार्ग्यो गार्ग्यौ इत्याद्ययुक्तं स्यात् ।

४. ननु कंसपरिमृड्भ्यामित्यादौ मृजेर्वृद्धिः दुर्वारा ।

५. ननु प्रजिघाययिषतीत्यादौ 'हेरचङि' इति विधीयमानं कुत्वं न स्यात् ।

६. ननु 'गतिस्थाघुपाभूभ्यः' इति सिचो लुक् अपासीत् इत्यादौ पातेरपि स्यात् ।

७. ननु स्वस्रादित्वप्रयुक्तः मातृशब्दस्य ङीप्निषेधः परिच्छेतृवाचकमातृशब्देऽपि स्यात् ।

८.ननु 'अस्थिदधि...इत्याद्यनङ्' प्रियसक्थ्ना ब्राह्मणेन इत्यत्र न स्यात् । अङ्गस्य नपुंसकत्वाभावात् ।

९. एओङ्, ऐऔच् सूत्रयोर्भाष्ये ज्ञापिता काचन परिभाषा ।

१०. ननु वृद्ध्यादिसञ्ज्ञाः समुदाये स्युः ।

–अनुवर्तते

## III. एकवाक्येन उत्तरं लिखत- 10x 01= 10

१. उच्चैरित्यत्र प्रत्ययः कः ? तेन व्यवधानेऽपि अव्ययसञ्ज्ञा कथम् ?

२. उदीचामातः स्याने....इति सूत्रे स्थानेग्रहणेन का परिभाषा ज्ञाप्यते ।

३. पूरयत-नानार्थके.........................।

४. किरतीत्यत्र 'तित्स्वरितम्' इति स्वरितत्वं किमर्थं न भवति ।

५. प्रतिपदोक्तस्य प्राबल्ये किं बीजम् ?

६. समुदाये वाक्यपरिसमाप्तेः लौकिकमुदाहरणं प्रदर्शयत ।

७. सर्वनामानि इत्यत्र णत्वप्राप्तिः केन सूत्रेण प्राप्ता ? परिहारश्च कथम् ?

८. व्याकरणे पर्जन्यवत् किं प्रवर्तते ?

९. स्वार्थे प्रत्ययः इत्यत्र स्वशब्दार्थः कः ?

१०. सन्निपातलक्षणः इत्यस्य विग्रहवाक्यं प्रदर्शयत ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : MR-08**

# स्नातकपरीक्षाः–२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– व्याकरणम्

**भागः - १, पत्रिका -२**

**विषयः - प्रौढमनोरमा**

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **05x 10 =50**

१. सोदाहरणं 'हलस्तद्धितस्य' इति सूत्रं व्याख्यात ।

२. 'अर्थे प्रथमा' इत्येव सारमिति पक्षं यथाग्रन्थं समर्थयत ।

३. कारिकामिमां व्याख्यात–

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ।।

४. 'साधकतमं करणम्' इति सूत्रं सोदाहरणं व्याख्यात ।

५. अनभिहिताधिकारस्य दीक्षितोक्तदिशा फलमुपपाद्य सिद्धान्तयत ।

६. गतिबुद्धिप्रत्यवसानार्थ...सूत्रं सोदाहरणं प्रपञ्चयत ।

**II. यथानिर्देशम् अष्टानामेव उत्तरं लिखत** **08x 05 = 40**

१. सोदाहरणं स्वाङ्गलक्षणं प्रदर्शयत ।

२. 'पितुरत्र क्रियासम्बन्धः शाब्दः' वाक्यमिदं ससन्दर्भं विवृणुत ।

३. 'अर्थनिबन्धनेयं सञ्ज्ञा' इत्यस्याशयं सोदाहरणं स्पष्टयत ।

४. कारिकामिमां व्याख्यात–

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ।।

५. अधिकरणसञ्ज्ञाविधायकसूत्रं व्याख्याय, आधारत्रैविध्यं विवृणुत ।

६. 'रामेण बाणेन हतो वाली' इत्यस्य शाब्दबोधं प्रदर्शयत ।

७. परिगणितद्विकर्मकधातून् निर्दिशत ।

–अनुवर्तते

८. वैयाकरणाभिमतं जातिलक्षणं प्रदर्शयत ।

९. 'देवदत्तः हरिं भजति' इत्यस्य शाब्दबोधं प्रदर्शयत ।

१०. 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रं विवृणुत ।

## III. एकवाक्येन उत्तरं लिखत- 10x 01= 10

१. 'अजा' इत्यत्र केन सूत्रेण टाप् भवति ?

२. 'तद्धिताः' इत्यत्र महासञ्ज्ञाकरणं किमर्थं कृतम् ?

३. कारकाणि कति ? कानि तानि ?

४. 'कृष्णस्य कृतिः' इत्यत्र केन सूत्रेण षष्ठी भवति ?

५. 'भीत्रार्थानां भयहेतुः' इत्यस्योदाहरणमेकं प्रदर्शयत ।

६. किमकथितं कर्म ?

७. नमः योगे केन सूत्रेण का विभक्तिः भवति ?

८. 'अलं मल्लो मल्लाय' इत्यत्र अलंशब्दः किमर्थकः ?

९. 'प्रासादात् प्रेक्षते' इत्यस्य अर्थः कः ?

१०. 'वैकुण्ठमध्यास्ते' इत्यत्र वैकुण्ठशब्दस्य कर्मसञ्ज्ञा केन सूत्रेण ?

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : MR-09**

# स्नातकपरीक्षाः–२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः - १, पत्रिका -३

### विषयः - व्याकरणमहाभाष्यम्-३

**दिनाङ्कः** - 02-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन उत्तरं लिखत-** **10x 01= 10**

१. शक्तिग्राहकशिरोमणिः कः ?

२. 'महाभाष्यम्' इत्यस्य विग्रहः कथं कार्यः ?

३. 'वृद्धिरादैच्' इत्यत्र कुत्वं किमर्थं न ?

४. 'गोनर्दीय' इति प्रसिद्धः कः ?

५ सञ्ज्ञाकरणं किमर्थम् ?

६. महाभाष्यस्य प्रदीपव्याख्यानं केन विरचितम् ?

७. 'नायं तच्छेषः' इत्यत्र तत्पदेन कस्य सूत्रस्य ग्रहणम् ?

८. 'उद्योतकार' इति कः प्रसिद्धः ?

९. हलन्तलक्षणा वृद्धिः केन विधीयते ?

१०. उभयसञ्ज्ञान्यपि छन्दांसि दृश्यन्ते इत्यत्र गृहीते उभे सञ्ज्ञे के ?

**II. ससन्दर्भम् अष्टौ व्याख्यात** **08x 05= 40**

१. यद्यचो वृद्धिरुच्यते, 'न्यमार्ट्' अटोऽपि वृद्धिः प्राप्नोति ।

२. वृद्धिग्रहणमुत्तरार्थम् ।

३. अथवा सर्वत्रैवात्र स्थानी निर्दिश्यते ।

४. 'अदेङ्गुणो वृद्धिश्च' इत्यदेङां वृद्धिसञ्ज्ञापि प्राप्नोति ।

५. अत्यवचनाच्चकाराकरणाच्च प्रकृतापवादो विज्ञायते ।

६. सन्देहमात्रमेतद्भवति ।

७. निवर्तकं शास्त्रम् ।

–अनुवर्तते

८. अथेदका गुणा इत्येव न्याय्यम् ।

९. कथं वृद्धिरादैच् इति ।

१०. नेह प्रयोगनियम आरभ्यते ।

**III. यथारुचि पञ्चैव प्रश्नाः समाधेयाः** **05x10=50**

१. तच्छेषतदपवादपक्षयोः समुत्थाने बीजं प्रदर्श्य तच्छेषपक्षाङ्गीकारे सम्भाव्यमानान् दोषान् सप्रमाणं विशदयत ।

२. 'सिद्ध्यत्येवम्, अपाणिनीयं तु भवति' इत्यस्य किं तात्पर्यम् ?

३. 'सर्वादेशप्रसङ्गश्चानिगन्तस्य' इत्यस्याशयं सभाष्यं प्रदर्शयत ।

४. 'इको गुणवृद्धी' सूत्रे अग्ग्रहणस्य सार्थक्यं स्पष्टयत ।

५. 'आदैच्' इत्यत्र तपरकरणं किमर्थम् ? विषयेऽस्मिन् भाष्यसिद्धान्तः कः ? विचार्य लिखत ।

६. तद्भावितग्रहणपदार्थः कः ? तद्भावितपक्षः स्वीकार्य उत न ? ग्रन्थकृदाशयं प्रकटयत ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : MR-10**

# स्नातकपरीक्षाः–२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः - १, पत्रिका -४

### विषयः - लघुशब्देन्दुशेखरः (स्वरसन्ध्यन्तः)

**दिनाङ्कः** - 04-04-2016 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. प्रश्नानुगुणं लघूत्तरं लिखत-** **10x 01= 10**

१. प्रत्याहारसूत्रे आदिलक्षणं किम् ?

२. पदसञ्ज्ञासूत्रे 'अन्तग्रहणँ' किमर्थम् ?

३. संयोगसञ्ज्ञा समुदायस्य ? उत प्रत्येकम् ?

४. स्थानत आन्तर्यस्य उदाहरणँ कुत्र ?

५. अनेकाल्सूत्रे शिद्ग्रहणेन ज्ञापिता परिभाषा का ?

६. 'तस्य लोपः' सूत्रेऽस्मिन् तस्येत्यस्य प्रयोजनं किम् ?

७. पुरस्तादपवादाः...............नोत्तरान् । पूरयत ।

८. पातञ्जले महाभाष्ये...............गर्भजः । पूरयत ।

९. कचयोस्तु न सावर्ण्यम् । कुतः ?

१०. 'लण्' सूत्रस्थ-अवर्णस्य इत्सञ्ज्ञा केन सूत्रेण ?

**II. अष्टावेव प्रश्नाः समाधेयाः** **08x05= 40**

१. 'मुनित्रयं नमस्कृत्य' अत्र चतुर्थीमापाद्य परिहरत ।

२. 'अ इ उण्' इत्यादिषु संहिता कार्यं कुतो न ?

३. 'अक्षरसमाम्नायः' इति व्यवहारेऽनुपपत्तिं प्रदर्श्य परिहरत ।

४. 'अनुबन्धा एकान्ता एव' । विवृणुत ।

५.'विरामोऽवसानम्' नागेशाशयसहितं वर्णयत ।

६. 'ह य व र ट्' इत्यादिसूत्रस्थ-अकारस्य हल्त्वामापाद्य परिहत ।

–अनुवर्तते

७. सञ्ज्ञासूत्राणि लिखत ।

१. अनुनासिकः २. सवर्णम् ३. टि ४. धातुः ५.गुणः

८. सन्धिविधायकसूत्राणि लिखत ।

१. यण् २. गुणः ३. वृद्धिः ४. प्रकृतिभावः ५. पूर्वरूपम्

९. 'अवैहि' इति वृद्धिरसाधुरेव । कारणं विवृणुत ।

१०. 'अदर्शनं लोपः' सूत्रमिदं वर्णयत ।

**III. यथारुचि पञ्चैव प्रश्नाः समाधेयाः** **05x10=50**

१. 'प्रत्याहारेऽनुबन्धानां कथमग्रहणेषु न' ससन्दर्भं व्याख्यात ।

२. 'पूर्वत्रासिद्धम्' अस्य अधिकारत्वे फलं वर्णयत ।

३. 'एत्येधत्यूठ्सु' सूत्रमिदं व्याख्याय पररूपगुणापवादत्वं प्रतिपादयत ।

४. तपरसूत्रं विध्यर्थम् ? उत नियमार्थम् ? प्रपञ्चयत ।

५. 'यत्तु उपजीव्यविरोधात् सन्धिर्न' ग्रन्थदिशा विशदयत ।

६. स्थानिवत्सूत्रं विवृणुत ।

७. 'निपात एकाजनाङ्' अस्यार्थमुपवर्ण्य 'अनाङ्'पदस्य प्रयोजनं वर्णयत ।

८. 'षष्ठी स्थानेयोगा' परिभाषामिमां विवृणुत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSV-06**

# स्नातकोत्तरपरीक्षा:—२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -१ , पत्रिका -१

### विषयः - लघुशब्देन्दुशेखरः(अजन्तपुल्लिङ्गान्तः)

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. प्रश्नानुगुणं उत्तरं लिखत** **10x01= 10**

१. नत्वा फणीशं...........शेखरम् । पूरयत ।

२. 'तदुक्तीः परिभाव्य च' अत्र परिभाव्यपदस्यार्थः कः ?

३. लघुशब्देन्दुशेखरग्रन्थस्य विषयाः के ?

४. 'माहेश्वराणि' इत्यस्य योगार्थं वर्णयत ।

५. नृत्तावसाने...............शिवसूत्रजालम् । पूरयत ।

६. कचयोस्तु न सावर्ण्यम् । कुतः ?

७. ह्रस्व-दीर्घ-प्लुतसञ्ज्ञाः केषां वर्णानाम् आयान्ति ?

८. 'ङ्याप्प्रातिपदिकात्' अत्र समासः कः ?

९. सुप् प्रत्ययाः कति वर्तन्ते ?

१०. 'रामाय' इत्यत्र यादेशविधायकं सूत्रं किम् ?

**II. सङ्क्षेपेण विवृणुत** **05x02 = 10**

१. 'अ इ उ ण्' इत्यादिषु संहिताकार्यं कुतो न ?

२. 'र'प्रत्याहारसिद्धिं प्रदर्शयत ।

३. बाह्यप्रयत्नाः कति ? नामानि निर्दिशत ।

४. इ, क, न, प एतेषाम् उत्पत्तिस्थानानि लिखत ।

५. 'न वेति विभाषा' सूत्रेऽस्मिन् 'इति'करणं किमर्थम् ?

–अनुवर्तते

## III. षट् प्रश्नानेव समाधत्त 06x05 = 30

१.'अणुदित्' सूत्रस्थम् अप्रत्ययपदं व्याख्याय अत्राण् परेण? उत पूर्वेण ? विमृशत ।

२. 'स्थानेऽन्तरतमः ' परिभाषामिमां वर्णयत ।

३. 'तस्य लोपः' अत्र तस्येति पदस्य प्रयोजनं चिन्तयत ।

४. 'ईदूदेद्विवचनं प्रगृह्यम्' सोदाहरणं व्याख्यात ।

५. सन्धिविधायक सूत्राणि लिखत–

१. वृद्धिः २. श्चुत्वम् ३. अनुनासिकः ४. अनुस्वारः ५. यण्

६. 'अवैहि' इत्यत्र वृद्धेरसाधुतां सहेतुकं वर्णयत ।

७. सर्वनामसञ्ज्ञासूत्रे- सर्वादीनि' इत्यत्र कः समासः ? विशदयत ।

८. 'सुप्'प्रत्ययान् वर्गीकृत्य निर्दिशत ।

९. 'रामेण' अत्र सुप्प्रत्ययः कः ? कथं रूपसिद्धिः ?

१०. सरूपसूत्रं वर्णयत ।

## IV. यथारुचि द्वावेव व्याख्यात 02x15= 30

१. 'पूर्वत्राऽसिद्धम्' अस्याधिकारत्वं सम्पाद्य असिद्धपदं विवेचयत ।

२. 'अनेकाल्' सूत्रे शिद्ग्रहणस्य वैयर्थ्यमापाद्य परिहरत ।

३. प्रातिपदिकसञ्ज्ञाविधायकसूत्रद्वयं वर्णयत ।

४. रूपसिद्धिप्रकारं ससूत्रं प्रदर्शयत–

१. रामैः २. सर्वस्मै ३. हरयः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSV-07**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

### भागः - १, पत्रिका -२

### विषयः - महाभाष्यम्-५-९ (आह्निकानि)

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. यथारुचि द्वयोः प्रश्नयोः उत्तरं लिखत** **02x15= 30**

१. घुसञ्ज्ञायां प्रकृतिग्रहणस्य प्रयोजनं प्रसाध्य खण्डयत ।

२. 'निपात एकाजनाङ्' इति सूत्रे दलकृत्यं प्रदर्श्य, आङः ङिदङिद्विवेकं प्रदर्शयत ।

३. 'स्थानेऽन्तरतमः'इति सूत्रे प्रथमान्तपाठः उत सप्तम्यन्तपाठः ? भाष्योक्तदिशा विचारयत ।

४. 'प्रत्ययस्य लुक्श्लुलुपः' इति सूत्रे प्रत्ययग्रहणस्य प्रयोजनं सम्यगुपपादयत ।

**II. अधो निर्दिष्टानां सङ्क्षेपेणोत्तरं लिखत (षण्णामेव)** **06x05 = 30**

१. 'निष्ठासञ्ज्ञायां समानशब्दप्रतिषेधः' इति वार्तिकं सोपपत्तिकं खण्डयत ।

२. 'ष्णान्ता षट्' इति सूत्रे उपदेशग्रहणं कर्तव्यं न वेति सम्यग्विचारयत ।

३. 'सर्वादीनि सर्वनामानि' इत्यत्र सर्वशब्दस्य सर्वनामसञ्ज्ञा कथमिति प्रतिपाद्य, सर्वनामशब्दे णत्वाभावं प्रसाधयत ।

४. 'टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः' इति वार्तिकं ससन्दर्भं व्याख्यात ।

५. 'मिदचोन्त्यात्परः' इति सूत्रे मितः अभक्तत्वे दोषान् प्रदर्श्य सिद्धान्तं प्रकटयत ।

६. 'स्थानेऽन्तरतमः' इति सूत्रे तमब्ग्रहणस्य सार्थक्यं प्रतिपादयत ।

७. 'अलोन्त्यस्य' इति सूत्रे अल्ग्रहणं किमन्त्यविशेषणमुत आदेशविशेषणम्' स्पष्टं प्रतिपादयत ।

८. स्थानिवत्सूत्रे वतिग्रहणस्य आदेशग्रहणस्य च फलं भाष्यरीत्या प्रदर्शयत ?

–अनुवर्तते

## III. टिप्पणीमारचयत 02x02 = 10

१. उगिद्वर्णग्रहणवर्जम् ।

२. अव्ययलक्षणम् ।

३. वा नामधेयस्य ।

४. अनेकविधमान्तर्यम् ।

५. तक्रकौण्डिन्यन्यायः ।

## IV. एकवाक्येन उत्तरं लिखत 10x01= 10

१. सम्प्रसारणसञ्ज्ञाविधायकं सूत्रं लिखत ।

२. 'आचलवत्' इत्यस्य विग्रहवाक्यं प्रदर्शयत ।

३. 'अतिसर्वाय' इत्यत्र सर्वशब्दस्य सर्वनामसञ्ज्ञा कुतो न ?

४. 'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रे समासग्रहणं किमर्थम् ?

५.'मिदचोन्त्यात्परः' इत्यत्र अचः इत्यत्र कस्मिन्नर्थे षष्ठी ?

६. 'उरण्रपरः' इत्यत्र उरित्यस्य विभक्तिं निर्दिशत ।

७. 'षष्ठी स्थानेयोगा' इति सूत्रे स्थानेयोगा पदस्य विग्रहवाक्यं प्रदर्शयत ।

८. सन्निपातपरिभाषास्वरूपं प्रदर्शयत ।

९. 'युवतिः जाया यस्य' इत्यस्य परिनिष्ठितरूपं लिखत ।

१०. 'सुडनपुंसकस्य' इत्यत्र नञ् किमर्थकः ?

—o—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSV-08**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -१ , पत्रिका -३

### विषयः - भूषणसारः

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः** **10x01= 10**

१. व्यापारो नाम कः ?

२. किं नाम साध्यत्वम् ?

३. कृञो यत्रार्थकताया अस्वीकारे साधकम् एकं प्रदीयताम् ?

४. ईप्सितं कर्म कतिविधम् ? एकैकमुदाहरणं प्रदीयताम् ।

५. किं नाम वर्तमानत्वम् ?

६. वह्निश्चेत् प्राज्वलिष्यत् ओदनमपक्ष्यत् इत्यत्र कीदृशः शाब्दबोधः ?

७. अधिकरणत्रैविध्यं सोदाहरणं प्रतिपाद्यताम् ?

८. पञ्चकं प्रातिपदिकार्थः इति पक्षे के ते पञ्च अर्थाः ?

९. पूर्वपदार्थप्रधानोऽव्ययीभावः इत्यादिः प्रायोवादः इत्यत्र एका युक्तिः प्रदर्श्यताम् ?

१०. बहूनां वृत्तिधर्माणामित्यत्र वृत्तिधर्माः के ?

**II. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः** **05x02 = 10**

१. तिङर्थाः के ? ते क्व विशेषणानि भवन्ति ?

२. परोक्षत्वं नाम किम् ? 'व्यातेने किरणावलीमुदयनः' इति प्रयोगः भूषणसारकारानुसारेण सङ्गतो न वा ?

३. आश्रयोऽवधिरुद्देश्यः इति कारिका सङ्क्षेपेण विव्रियताम् ?

४. शास्त्रे लिङ्गव्यवस्था किमाधारेण क्रियते ? केषाञ्चिदनेकलिङ्गत्वव्यवहारः कथमुपपद्यते ?

५. षड्विधस्यापि समासस्य एकैकमुदाहरणं प्रदीयताम् ?

–अनुवर्तते

## III. एषु षट् प्रश्नाः समाधेयाः 06x05= 30

१. 'साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम्' विशदीक्रियताम् ।

२. अस्त्यादीनां क्रियावाचकत्वं संसाध्यताम् ।

३. 'सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः' विव्रियताम् ।

४. फलस्य धातुवाच्यत्वे युक्तयः प्रदीयन्ताम् ।

५. भूषणसारकारमतेन लिङर्थः कः इति निष्कृष्य प्रतिपाद्यताम् ।

६. 'चैत्रो ग्रामं गच्छति' इत्यत्र 'चैत्रश्चैत्रं गच्छति' इति, 'प्रयागतः काशीं गच्छति चैत्रे प्रयागं गच्छति' इति प्रयोगश्च कथं वार्यते इति नैयायकमतानुवादपुरःसरं वर्ण्यताम् ।

७. 'अवधिः पञ्चम्यर्थः' यथाग्रन्थं विशदीक्रियताम् ।

८. 'एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा पञ्चापि पक्षाः निरूप्यन्ताम् ।

९. 'जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती तद्वैविध्यं च निरूप्यताम् ।

१०. 'प्राप्तोदको ग्रामः' इत्यत्र समासशक्त्यस्वीकारे का अनुपपत्तयः ?

## IV. एषु द्वौ प्रश्नौ समाधेयौ 02x15=30

१. फलव्यापारयोः धात्वर्थत्वं भूषणसारानुसारेण संसाधयत ।

२. 'आश्रये तु तिङः स्मृताः' इति कारिकांशं विशदयत ।

३. 'शब्दोऽपि शाब्दबोधे भासते' इत्येतत् सप्रमाणं स्पष्टयत ।

४. 'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' इत्यादिकारिकाः विवृत्य भूषणसारकृन्मतानुसारेण वृत्तौ एकार्थीभावस्वीकारे युक्तीः प्रदर्शयत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSV-09**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -१ , पत्रिका -४

### विषयः - काशिका प्रथमाध्यायः १-२पादौ

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षेपेण उत्तरं लिखत** **10x01= 10**

१. किमर्थो वर्णानाम् उपदेशः ?

२. अकारस्य विवृतोपदेशः किमर्थः ?

३. सङ्क्रमशब्दस्य अर्थं लिखत ।

४. 'मणीवोष्ट्रस्य लम्बेते' इत्यत्र मणीशब्दस्य प्रगृह्यसञ्ज्ञा कुतो न ?

५. 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम्' इति सूत्रे व्यवस्थाशब्दस्य कोऽर्थः ?

६. 'अदर्शनं लोपः' इति सूत्रे अदर्शनशब्दस्य के अर्थाः ?

७. 'यस्मिन् विधिस्तदावल्ग्रहणम्' इति वार्तिकस्य अर्थं लिखत ।

८. बहुश्रेयसी शब्दस्य पुंसि विद्यमानस्य ह्रस्वत्वं कुतो न ?

९. 'लुपि युक्तवद्व्यक्तिवचने' इत्यत्र युक्तवत्शब्दार्थं यथाग्रन्थं व्याख्यात ।

१०. 'नपुंसकमनपुंसके नैकवच्चास्यान्यतरस्याम्' इति सूत्रस्यार्थं लिखत ।

**II. सर्वे प्रश्नाः समाधेयाः** **05x02 = 10**

१. प्रत्याहारे अनुबन्धानां ग्रहणं कुतो न ?

२. 'मुखनासिकावचनः' इति शब्दस्य विग्रहं प्रदर्श्य, स्थानिवत्सूत्रे वत्करणस्य किं फलमिति लिखत ।

३. 'तपरस्तत्कालस्य' इति सूत्रस्यार्थं लिखित्वा तपरशब्दस्य द्वेधा विग्रहं प्रदर्शयत ।

४. 'हलन्ताच्च' इति सूत्रस्य अर्थोदाहरणे लिखत ।

५. 'पुत्रश्च दुहिता च' इत्यत्र एकशेषरूपं किम् ? किं च तद्विधायकं सूत्रम् ?

–अनुवर्तते

## III. यथारुचि षट् प्रश्नाः समाधेयाः 06x05= 30

१. लृकारोपदेशस्य प्रयोजनानि सङ्गृह्य लिखत ।

२. 'इको गुणवृद्धी' इति सूत्रे इग्ग्रहणस्य आवश्यकतां प्रतिपादयत ।

३. 'ईदूतौ च सप्तम्यर्थे' इति सूत्रं यथाग्रन्थं व्याख्यात ।

४. 'न वेति विभाषा' इति सूत्रे इतिकरणस्य प्रयोजनं विलिख्य,उभयत्रविभाषाः प्रयोजयन्ति' इति ग्रन्थाशयं सोदाहरणं लिखत ।

५. 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति द्विः प्रत्ययग्रहणस्य प्रयोजनं विवृणुत ।

६. तपरसूत्रं विध्यर्थमिति यथाग्रन्थं निरूपयत ।

७. एकः कित्वं गुणो मा भूत् दीर्घारम्भात् कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणान्तु प्रसज्यते ।।' इति कारिकां व्याख्यात ।

८. 'ऊकालोऽज् ह्रस्वदीर्घप्लुतः' इति सूत्रे ऊकालशब्दस्य विग्रहं प्रदर्श्य कालग्रहणस्य प्रयोजनं लिखत ।

९. 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति सूत्रस्यार्थं सोदाहरणं प्रतिपाद्य प्रातिपदिकग्रहणं किमर्थमिति निरूपयत ।

१०. 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' इति सूत्रं यथाग्रन्थं व्याख्यात ।

## IV. द्वौ प्रश्नौ समाधेयौ 02x15=30

१. वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते न वेति पक्षद्वयं काशिकानुसारेण प्रतिपाद्यत ।

२. 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रं यथाग्रन्थं सदलकृत्यं व्याख्याय धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशानां प्रत्येकमुदाहरणं लिखत ।

३. अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रं ग्रन्थानुसारं व्याख्याय कृत्तद्धितसूत्रे समासग्रहणस्य नियमार्थत्वमुपपादयत ।

४. सरूपसूत्रार्थं सपदकृत्यं विवृत्य द्रव्यं पदार्थ इति पक्षे सूत्रारम्भस्यावश्यकतां प्रतिपादयत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSVG-10**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -२ , पत्रिका -५

### विषयः - स्वशास्त्रेतिहासः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. यथारुचि प्रश्नद्वयस्य उत्तरं लिखत** **02x15=30**

१. रक्षोहागामलध्वसन्देहाः प्रयोजनम् । कस्य ? सोदाहरणं विशदयत ।

२. सप्रभेदं स्फोटस्वरूपं विशदयत ।

३. नागेशस्य काल-देश-कृतीरधिकृत्य प्रबन्धमेकमारचयत ।

**II. सङ्क्षेपेण षण्णामेव उत्तरं लिखत** **06x05= 30**

१. पाणिनीयव्याकरणस्य वैशिष्ट्यं निपुणं प्रतिपादयत ।

२. कात्यायनप्रणीतवार्त्तिकानां महत्त्वं विवृणुत ।

३. भर्तृहरणिा युक्तेरपि आगमस्य प्राबल्यं कथङ्कारं वा प्रतिपादितमिति विशदयत ।

४. वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य कौमुदीसादृश्यं कथमिति विवृणुत ।

५. सूत्रप्रभेदं विलिख्य, सोदाहरणं तेषां स्वरूपं प्रकाशयत ।

६. कातन्त्रव्याकरणस्य वैशिष्ट्यं किमिति सप्रमाणं विवृणुत ।

७. भाष्यकृत्प्रकाशितम् आचार्यस्य पाणिनेर्महत्त्वं प्रपञ्चयत ।

**III. टिप्पणीमारचयत** **05x02= 10**

१. धातुपाठः

२. काशिका

३. अक्षरसमाम्नायः

४. परिभाषा

५. आकृतिगणः

–अनुवर्तते

## IV. एकवाक्येन उत्तरं लिखत 10x01=10

१. प्रौढमनोरमाग्रन्थस्य प्रधानव्याख्यानद्वयं निर्दिशत ।

२. वाक्यपदीये कति काण्डानि सन्ति ? कानि तानि ?

३. सायणाचार्यविरचितव्याकरणग्रन्थस्य नाम किम् ?

४. 'महाभाष्यम्' इत्यत्र किंरूपं महत्त्वं विवक्षितम् ?

५. अष्टाध्याय्याम् अङ्गाधिकारव्याप्तिं निर्दिशत ।

६. प्रत्याहारशब्दस्य व्युत्पत्तिं प्रदर्शयत ।

७. अष्टके कति सूत्राणि सन्ति ?

८. त्रिपादी इत्यस्य विग्रहवाक्यं विलिख्य, पादान् निर्दिशत ।

९. पाणिनिना अष्टाध्याय्यां कति पूर्वाचार्याः स्मृताः ?

१०. शब्दकौस्तुभाख्यग्रन्थस्य कर्ता कः ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSV-06**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– व्याकरणम्

**भागः -१ , पत्रिका -१**

**विषयः - लघुशब्देन्दुशेखरः (अजन्तस्त्रीलिङ्गतः कारकान्तः)**

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. प्रश्नानुगुणं लघूत्तरं लिखत** **10x01=10**

१. 'रमा' इत्यत्र टापि कृते प्रातिपदिकत्वं कथम् ?

२. ङ्यन्तात् 'लक्ष्मी'शब्दात् सुप्रत्यये विसर्गः कुतो न ?

३. 'द्यौः' इत्यत्र औत्वं केन सूत्रेण ?

४. 'हिरुक्' इत्यव्ययम् क्रियाप्रधानम् ? उत सामान्यम् ?

५. स्त्रीप्रत्ययाः स्त्र्यर्थस्य द्योतकाः ? उत वाचकाः ?

६. प्रातिपदिकार्थ..........प्रथमा । पूरयत ।

७. गतिबुद्धि.................स णौ । पूरयत ।

८. अपाये यदुदा.............मुच्यते । पूरयत ।

९. सम्बोधनं नाम किम् ?

१०. षट् कारकाणि कानि ?

**II. सङ्क्षेपेण विवृणुत** **05x02= 10**

१. प्रातिपदिकार्थः ।

२. कारके ।

३. स्त्रीप्रत्ययाः ।

४. कर्ता ।

५. अधिकरणम्

–अनुवर्तते

## III. द्वयोरेव व्याख्यानं कुरुत 02x15= 30

१. कर्मलक्षणं सदलकृत्यं प्रतिपाद्य अनुवृत्तौ पुनः कर्मग्रहणस्य प्रयोजनं सूपपादयत ।

२. 'साधकं करणम्' इत्युक्ते इष्टसिद्धिं प्रदर्श्य तमपः प्रयोजनं प्रतिपादयत ।

३. 'ध्रुवमपायेऽपादानम्' सूत्रमिदं वर्णयित्वा ध्रुवलक्षणं विचिन्तयत ।

४. 'कर्तृकर्मणोः कृति' अत्र कृतिग्रहणस्य सार्थकतां विमृशत ।

## IV. षण्णामेव शाब्दबोधप्रकारं प्रदर्शयत 06x05=30

१. ग्रामं गच्छति ।

२. द्रोणो व्रीहिः ।

३. वृक्षात् पर्णं पतति ।

४. बलिं याचते वसुधाम् ।

५. विप्राय गां ददाति ।

६. चैत्रः पचति ।

७. मैत्रं ग्रामं गमयति ।

८. ओदनं भुङ्क्ते ।

९. पर्वते वृक्षाः सन्ति ।

१०. मासमधीते ।

—०—

Total No. of Questions : 4 ]　　　　　　　　[ Total No. of Printed Pages : 2

**Code No. : MSSV-07**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः - १, पत्रिका -२

### विषयः - महाभाष्यम्

**दिनाङ्कः** - 29-03-2016 ]　　　　　　　　[ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30 P.M. to 05.30 P.M. ]　　　　　　　　[ Max. Marks : 80

---

## I. रिक्तस्थानं पूरयत　　　　**10x01=10**

१. भूवादीनां...........प्रयुज्यते ।

२. स्वरितञितः.......क्रियाफले ।

३. णेरणौ.............नाध्याने ।

४. समः.................।

५. क्रिया नामेय............निदर्शयितुम् ।

६. अनुदात्त..........आत्मनेपदम् ।

७. कर्तरि..............हारे ।

८. आङो ..............विहरणे ।

९. समव..............रस्थः ।

१०. आम् प्रत्य...............प्रयोगस्य ।

## II. लघूत्तरं लिखत　　　　**05x02= 10**

१. भावविकाराः कति ? के च ते ?

२. प्रतिषेधे हसादीनाम् उदाहरणानि कति ?

३. 'अनुक्रीडति माणवकम्' अत्रात्मनेपदं कुतो न ?

४. 'आपृच्छते गुरुम्' अत्रात्मनेपदम् केन ?

५. 'व्यक्तवाचां समुच्चारणे' इत्यत्र 'व्यक्तवाचाम्' इत्यस्य अर्थः कः ?

–अनुवर्तते

## III. षण्णामेव व्याख्यानं कुरुत 06x05=30

१. भाववचनो धातुः ।

२. परस्परोपपदाच्च ।

३. शिक्षेर्जिज्ञासायाम् ।

४. आशिषि नाथः ।

५. वा लिप्सायाम् ।

६. उद ईहायाम् ।

७. उद्विभ्यां तपः ।

८. विपराभ्यां जेः ।

९. आत्मनेपदसञ्ज्ञा ।

१०. भावः ।

## IV. यथारुचि द्वावेव व्याख्यात 02x15=30

१. धातुसञ्ज्ञायां भूवादिपाठस्य प्रयोजनं वर्णयत ।

२. 'क्रियावचनो धातुः' इति न्यासाशयमुपवर्ण्य दोषान् प्रदर्शयत ।

३. आत्मनेपदग्रहणं नियमार्थम् ? उत विध्यर्थम् ? विमृशत ।

४. स्वरितञितः......सूत्रं सोदाहरणं व्याख्यात ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSV-08**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -१ , पत्रिका -३

## विषयः - वैयाकरणसिद्धान्तलघुमञ्जूषा

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. यथारुचि प्रश्नद्वयं समाधत्त** **02x15=30**

१. वाक्यस्फोटस्य मुख्यत्वं प्रतिपादयत ।

२. अनुबन्धचतुष्टयनिर्देशपूर्वकं मङ्गलश्लोकं व्याख्यात ।

३. शाब्दबोधे गृहीतवृत्तेः हेतुत्वं प्रतिपादयत ।

४. लक्षणायां मीमांसकाभिप्रायम् आविष्कृत्य, ग्रन्थकृदभिमतलक्षणास्वरूपं विशदयत ।

**II. अधोनिर्दिष्टानां सङ्क्षेपेण उत्तरं लिखत (षण्णामेव)** **06x05=30**

१. शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः के ? सोदाहरणं प्रदर्शयत ।

२. आर्यम्लेच्छाधिकरणस्य तात्पर्यं लिखत ।

३. 'वस्तुतः तात्पर्यानुपपत्तिरेव तद्बीजम्' ससन्दर्भं विवृणुत ।

४. ईश्वरसङ्केतस्य शक्तित्वं ग्रन्थोक्तदिशा निराकुरुत ।

५. अपभ्रंशेषु शक्तिरस्ति न वेति सम्यग्विचारयत ।

६. सोदारणं गौण-शुद्धलक्षणाप्रभेदयोः स्वरूपं प्रदर्शयत ।

७. व्यञ्जनावृत्तेः स्वरूपं विविच्य तस्याः आवश्यकतां प्रतिपादयत ।

८. लाक्षणिकपदानां साधुत्वं कथमिति नागेशरीत्या प्रतिपादयत।

**III. टिप्पणीमारचयत** **05x02=10**

१. आप्तः ।

२. नागेशाभिमतशक्तिस्वरूपम् ।

३. तादात्म्यलक्षणम् ।

४. नैयायिकमते अपभ्रंशेषु बोधः ।

५. ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।

–अनुवर्तते

## IV. एकवाक्येन उत्तरं लिखत 10x01=10

१. शक्तिग्राहकशिरोमणिः कः भवति ?

२. पूरयत- अव्यक्तं तद्विदां....................।

३. साधुत्वलक्षणं लिखत ।

४. एकः शब्द इति श्रुतौ सुप्रयुक्त इत्यस्य कः अर्थः ?

५. असाधुषु प्रातिपदिकसञ्ज्ञा कुतो न भवति ?

६. टिघुभादीनां सञ्ज्ञावाचकानां कथं साधुत्वम् ?

७. योगशक्तेः स्वरूपं विलिख्य, उदाहरणमेकं प्रदर्शयत ।

८. अजहत्स्वार्था इत्यस्य विग्रहवाक्यं प्रदर्शयत ।

९. द्विरेफपदेन कथं वा भ्रमरबोधः भवति ?

१०. आदेशत्वं कस्य घटते ?

—०—

Total No. of Questions : 4 ]  [ Total No. of Printed Pages : 2

**Code No. : MSSV-09**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– व्याकरणम्

### भागः -१ , पत्रिका -४

## विषयः - वाक्यपदीयम् ब्रह्मकाण्डम्

**दिनाङ्कः** - 31-03-2016 ]  **[ गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ]  [ Max. Marks : 80

---

## I. एकेन वाक्येन उत्तरं लिखत  **10x01=10**

१. विवर्तस्य किं लक्षणम् ?

२. छन्दसां प्रथममङ्गं किम् ?

३. सूत्राणामतन्त्राणामित्यत्र अनुतन्त्रशब्देन किं ग्राह्यम् ?

४. वाक्यपदीयोक्तपदार्थद्वैविध्यं लिखत ।

५. पदे न वर्णा विद्यन्ते-इति कारिकां सम्पूर्णं लिखत ।

६. स्फोटनादयोः को भेदः ?

७. स्फोटशब्दस्य व्युत्पत्तिं लिखत ।

८. अस्वगोणीशब्दौ कस्मिन्नर्थे साधु कस्मिंश्च असाधु ?

९. वाक्यार्थनिर्णये कीदृशः तर्कः ग्राह्यः इति भर्तृहरिः मन्यते ?

१०. अपभ्रंशेषु साधुस्मरणात् शक्तिग्रह इति केषां मतम् ?

## II. सङ्क्षेपेण उत्तरं लिखत  **05x02=10**

१. भावविकाराः कति ? के च ते ?

२. परादिवाचां स्थानानि लिखत ।

३. न सोऽस्ति प्रत्ययः....इति कारिकां विलिख्य, कारिकायाः तात्पर्यं वाक्यद्वयेन लिखत ।

४. कायवाग्बुद्धिविषयमलानां विशुद्धिः कथं भवति ?

५. स्वरस्य षड्जादिभेदान् लिखत ।

–अनुवर्तते

## III. यथारुचि षट् प्रश्नाः समाधेयाः 06x05=30

१. आसन्नं ब्रह्मणः इत्यादिश्लोकार्थं विलिख्य व्याकरणं कथमुत्तमं तप इति प्रतिपादयत ।

२. 'तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते' इति यथाग्रन्थं निरूपयत ।

३. प्राकृतवैकृतध्वन्योः स्वरूपमुपवर्ण्य तयोः कार्यं ग्रन्थानुसारमुपपादयत ।

४. शब्दानां साधुत्वासाधुत्वे 'शिष्टेभ्य आगमात्' इति कारिकोक्तदिशा निरूपयत ।

५. संस्कारः इन्द्रियस्य उत शब्दस्य आहोस्विदुभयस्येति सोपपत्तिकं प्रतिपादयत ।

६. 'यत्नेनानुमितोऽप्यर्थः' इति कारिकां सम्पूर्य सप्रसङ्गं व्याख्यात ।

७. भर्तृहरिणा कति प्रमाणानि अङ्गीकृतानीति सप्रमाणं निरूपयत ।

८. 'ग्रह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा' इति दृष्टान्तस्य दार्ष्टान्तिके समन्वयं कुरुत ।

९. साधुशब्दप्रयोगस्य धर्मसाधनत्वं सप्रमाणं निरूपयत ।

१०. अपभ्रंशानां वाचकत्वावाचकत्वविचारं ग्रन्थानुसारं प्रतिपादयत ।

## IV. द्वौ प्रश्नौ समाधेयौ 02x15=30

१. वाचः चातुर्विध्यं निरूप्य, तस्या अक्षरत्वं प्रतिपाद्य, विवर्ततेऽर्थभावेन इत्यंशं व्याख्यात ।

२. नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः इत्यर्थं मुनित्रयोक्तिभिः सप्रमाणं निरूपयत ।

३. ध्वनिस्फोटविषये मतभेदान् प्रदर्श्य स्फोटभेदान् विवृणुत ।

४. सतो विवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी ।
इति न्यायो बहुविधस्तर्केण प्रतिभज्यते ।। इति कारिकां सोदाहरणं व्याख्यात ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSVG-10**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्— व्याकरणम्

### भागः -२ , पत्रिका - ५

### विषयः - परमलघुमञ्जूषा

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. एकेन वाक्येन उत्तरं लिखत** **10x01=10**

१. आप्तः कः ?

२. वृत्तिः कतिविधा ?

३. शक्तिर्नाम का ?

४. शब्दज्ञानानुपाती...इति सूत्रे विकल्पपदस्य कोऽर्थः ?

५. द्योतकत्वं नाम किम् ?

६. अभ्यासार्थे का वृत्तिराश्रीयते ?

७. किं नाम सकर्मकत्वम् ?

८. प्राकृतध्वनेः किं लक्षणम् ?

९. आदेशो नाम कः ?

१०. स्फोटाः कति ?

**II. यथारुचि षण्णामेव उत्तरं लिखत** **06x05=30**

१. शक्तेस्त्रैविध्यं यथाग्रन्थं निरूपयत ।

२. 'पदे न वर्णा विद्यन्ते-' इत्यस्याशयः कः ?

३. लक्षणाभावं कथं प्रतिपादितवान् भट्टनागेशः ?

४. व्यञ्जनापदार्थं यथाग्रन्थं विवेचयत ।

५. तात्पर्यानुपपत्तिप्रतिसन्धानं कस्या बीजम् ? स्पष्टयत ।

६. 'भावप्रधानमाख्यातम्' इति नैरुक्तवचनस्य किं तात्पर्यम् ?

–अनुवर्तते

७. सकर्मकत्वाकर्मकत्वयोः स्वरूपं यथानागेशं व्याख्यात ।

८. नैयायिकोक्तदिशा शाब्दबोधाङ्गीकारे का हानिः ? सोदाहरणं विमृशत ।

## III. अनयोः टिप्पणीमारचयत  2 x 5 =10

१. क्रिया

२. द्विविधो ध्वनिः

## IV. यथेष्टं द्वौ प्रश्नौ समाधेयौ  02x15=30

१. शाब्दबोधसहकारिकारणानि कानि ? विवृणुत ।

२. वृत्त्याश्रयः शब्दः कः ? विषयेऽस्मिन् नैयायिकराद्धान्तमुपवर्ण्य वैयाकरणसिद्धान्तं प्रकाशयत ।

३. असाधुशब्देष्वपि शक्तिरस्तीति स्वीकर्तुं कथं शक्यते ? यथाग्रन्थं विशदयत ।

४. नानार्थेषु शक्तेर्नियमने हेतून् प्रदश्र्य सोदाहरणं तान् व्याख्यात ।

—०—